# संस्कृतानुवादस्य विशेषसमस्या : समाधानानि च

प्रो. सुदेश कुमार शर्मा

एकस्यां भाषायां कथितवाक्यस्य भाषान्तरेण कथनम् अनुवाद: भवति। अनुवादेन भाषाम् अज्ञात्वा अपि तत्रोक्तं ज्ञानं झटिति प्राप्तुं शक्यते। सटीकानुवादाय अनुवादका: प्रशिक्षणम् अभ्यासं च प्राप्नुवन्ति। अद्यत्वे अनेके संस्कृतग्रन्था: अनुवादमुखेन एव विश्वपटले प्रसिद्धा: सञ्जाता:। अन्यभाषाणामपि अनेके ग्रन्था: संस्कृतेन अनुदिता: सन्ति। अन्यभाषाभि: सह संस्कृतस्य तुलनात्मकज्ञानं प्रदातुं शिक्षकस्य अनुवादकुशलता आवश्यकी अस्ति।

अनु इति उपसर्गपूर्वकात् वद व्यक्तायां वाचि इति भ्वादिगणस्थात् धातो: घञ् प्रत्यये अनुवादशब्द: निष्पद्यते। ऋग्वेदे एतस्य शब्दस्य 'पश्चात् कथनम्' इत्यर्थे **'अन्वेको वदति यद्ददाति तद्रूपामिनन्तदपा एक ईयते '**[i] प्रयोग: अस्ति। अष्टाध्यायीति ग्रन्थे महर्षिपाणिनि: **'अनुवादे चरणानाम्'**[ii] इति सूत्रं रचितवान्। एतस्य सूत्रस्य टीकायां कैय्यट: कथयति यत्- **'यदा प्रतिपत्ता प्रमाणान्तरावगतमप्यर्थं कार्यान्तरार्थं प्रयोक्ता प्रतिपाद्यते तदानुवादो भवति'**[iii] इति। अर्थात् यदा वक्ता केनापि प्रमाणेन ज्ञातां वार्ताम् अवान्तरप्रयोजनेन कमपि श्रोतारं प्रतिपादयति , तदा अनुवाद: भवति। आचार्य: भर्तृहरि: अपि **'आवृत्तिरनुवादो वा'**[iv] इति उक्त्वा पश्चात्कथनार्थे एव अनुवादशब्दं प्रयुक्तवान्।

अनुवादशिक्षणे अनुवादशब्दस्य 'पश्चात् कथनम्' इति अर्थ: नास्ति। अत्र आंग्लभाषाया: Translation (भाषान्तरम्) इति शब्दस्य अर्थे अनुवाद-शब्द: प्रयुज्यते। एष: शब्द: Trans (पारम्) lation (गमयनम्) इति शब्दद्वयस्य मेलनात् निष्पद्यते। भाषासन्दर्भे Translation इति शब्द: 'एकस्या: भाषाया: ज्ञानस्य अन्यभाषया कथनम्' इत्यर्थे प्रसिद्ध: जात:।

पाठक: श्रोता वा अनुवादमाध्यमेन अन्यभाषाया: सूचनां स्वमातृभाषायां त्वरितरूपेण अवगन्तुं शक्नोति। अनुवादस्य अस्य एव वैशिष्ट्यस्य कारणात् संस्कृतशिक्षणविधिषु अनुवादकलायां प्रवीणतायै व्याकरण-अनुवादविधि: आविर्भूत:। आदर्श-अनुवाददृष्ट्या संस्कृतविद्वद्भि: रचनानुवादकौमुदी , अनुवादचन्द्रिका, अनुवादरत्नाकर: इत्यादय: अनेके ग्रन्था: रचिता: सन्ति। येषु व्याकरणम् , शब्दकोश:, अनूदितपरिच्छेदा: इत्यादय: अनेके अनुवादसहायकविषया: उल्लिखिता: सन्ति।

अनुवादे सारल्यम् अस्ति , अत: प्राय: बहुत्र संस्कृतशिक्षणे अनुवादस्य एव समुपयोग: अधिकतया क्रियमाण: दृश्यते। एकं राष्ट्रम् अन्यराष्ट्रस्य ज्ञाननिधिम् अनुवादमाध्यमेन एव ज्ञातुं शक्नोति। संस्कृते अनुवादस्य उपयोगिता-विषये प्रश्न: एव नास्ति , किन्तु अनुवादस्य आधिक्येन

छात्रा: संस्कृतस्य स्थानं मातृभाषायाम् एव रमन्ते। अनेन ते संस्कृतस्य सम्भाषणशीलताया: परिचयं न प्राप्नुवन्ति। अनुवादेन छात्रा: संस्कृतस्य विषये ज्ञातुं शक्नुवन्ति , किन्तु संस्कृतं ज्ञातुं न शक्नुवन्ति। अत: एतत् आवश्यकम् अस्ति यत् छात्रा: अनुवादस्य कलां तु जानीयु:। किन्तु अनेन ज्ञानेन सह ते संस्कृतभाषया सम्भाषणे अपि कुशला: भवेयु:। तदा एव भाषाशिक्षणस्य उद्देश्यानां प्राप्ति: भवितुम् अर्हति।

**अनुवादशिक्षणस्य उद्देश्यानि**

-संस्कृतसाहित्यस्य अर्थावगमने क्षेत्रभाषाया: सहयोग-स्वीकरणम्।

-संस्कृतस्य क्षेत्रभाषया अनुवादे कुशलता-अर्जनम्।

-क्षेत्रभाषाया: संस्कृतेन अनुवादे कुशलता-अर्जनम्।

-अन्यभाषासाहित्यं संस्कृतेन अनूद्य संस्कृतसाहित्यस्य अभिवृद्धि-सम्पादनम्।

-विविधसाहित्यानां भाषाशैलीनां च तुलनात्मकम् अध्ययनम्।

-संस्कृतसाहित्यम् अन्यभाषाभि: अनूद्य संस्कृतसाहित्यस्य प्रचारणम्।

-छात्राणां शब्दभण्डारस्य वृद्धि-सम्पादनम्।

**संस्कृतभाषा अनुवाद: च**

संस्कृतग्रन्थानाम् अन्यभाषानुवाद: - विश्वसमुदाय: अनुवादमाध्यमेन एव संस्कृतेन सह परिचित: अस्ति। उदाहरणार्थं श्रीमद्भगवद्-गीताया: अनुवाद: विश्वस्य 75भाषाभि: सञ्जात:। केवलम् आङ्ग्लभाषया एव अनेकै: अनुवाद-लेखकै: स्वमत्या गीताया: 300 अनुवादा: कृता: सन्ति। एवमेव ईश-उपनिषद: 64 भाषासु पञ्चतन्त्रस्य 50 भाषासु रामायणस्य 22 भाषासु अनुवादग्रन्था: सन्ति। अद्यत्वे वेदा: , उपनिषद:, पुराणानि, महाभारतम्, चरकसंहिता, सुश्रुतसंहिता, कौटिल्य-अर्थशास्त्रम्, अभिज्ञानशाकुन्तलम्, मनुस्मृति: इत्यादय: अनेके संस्कृतग्रन्था: विश्वभाषासु अनूदिता: सन्ति।

अन्यभाषाग्रन्थानाम् संस्कृतानुवाद: - संस्कृतसाहित्यस्य अभिवृद्धि-दृष्ट्या संस्कृतज्ञानां च सौविध्यदृष्ट्या आधुनिकभाषासु रचितसाहित्यस्य संस्कृतेन अनुवाद: क्रियते। यथा भारतशासनस्य निर्देशे 1985 तमे वर्षे तर्कतीर्थ-लक्ष्मणशास्त्रीजोशी मङ्गलदेवशास्त्री इति एतौ महोदयौ भारतीय-संविधानस्य संस्कृतेन अनुवादं कृतवन्तौ।

संस्कृतग्रन्थानां संस्कृतेन पुन: अनुवाद: - साम्प्रतं सर्वासु अपि भाषासु एतादृशम् अनुवादकार्यं वृहद् स्तरे जायमानम् अस्ति। आङ्ग्ले तावत् एतस्य कृते Abridged (सारसंक्षेप:) इति शब्द: उपयुज्यते। एतादृशे अनुवादे प्राचीन-ग्रन्थानां या भाषा अस्ति , तया एव भाषया

सारांशरूपेण पुन: लेखनं क्रियते। संस्कृतक्षेत्रे अपि प्राचीनग्रन्थानां सरलसंस्कृतभाषया पुन: लेखनस्य कार्यम् अपि क्रियमाणम् अस्ति।

**अनुवादस्य प्रकारा:**

स्वरूप-आधारे अनुवादस्य प्रकारा: अधोलिखिता: सन्ति, तद्यथा -

**शब्दानुवाद:**

शब्दानुवादे शाब्दिक-अनुवाद: भवति। एष: अनुवाद: 'मक्षिकास्थाने मक्षिका '-सदृश: भवति। अर्थात् प्रथमभाषाया: शब्दस्य स्थाने द्वितीयभाषाया: शब्द: इति। यन्त्रानुवाद: (यथा Google Translate) अपि शब्दानुवाद: एव भवति। अस्मिन् अनुवादे शब्दकोशस्य महत्त्वम् अत्यधिकं भवति। अत्र सन्दर्भस्य , भावस्य लाक्षणिकार्थस्य व्यङ्ग्यार्थस्य च विषये अवधानं न दीयते इत्यत: अस्मिन् प्रायश: मूलवाक्यस्य सर्वथा भिन्न: एव आशय: सञ्जायते। उदाहरणार्थं 'सूर्यप्रकाश: गच्छति ' इत्यस्य आङ्ग्ल-अनुवादे 'Sunlight is going' इति अनुवाद: भवितुम् अर्हति। एवमेव 'A poet of first water' (अर्थात् उत्कृष्टकवि:) इत्यस्य 'प्रथमजलस्य कवि:' इति हास्यास्पदम् अनुवाद: भवेत्। एतादृशेन अनुवादेन प्रयोजनं नास्ति। कस्याम् अपि भाषायां शब्दानां चयनं सन्दर्भ-अनुगुणं क्रियते। सन्दर्भविषये अत्र अवधानं न दीयते , अत: एष: अनुवाद: अर्थनिष्पादनदृष्ट्या पूर्णरूपेण विश्वसनीय: न भवति।

**भावानुवाद:**

अस्मिन् अनुवादे अनुवादकर्ता मूलभाषाया: शब्दावलीम् , पदक्रमं वाक्यविन्यासं च परित्यज्य केवलं तस्य भावं गृह्णाति। तस्य लक्ष्यं केवलं मूलभाषाया: भावस्य प्रकटनं भवति। अस्मिन् भावप्रकटने सम्प्रेषणीयताया: महत्त्वं सर्वाधिकं भवति। एष: अनुवाद: भावसादृश्ये केन्द्रित: भवति। येन अर्थस्य अवगमनं सारल्येन भवेत्। किन्तु एतादृशेन अनुवादेन मूलरचनाया: भावस्य तु रक्षा भवति , किन्तु तस्या: शैल्या: रक्षणं न भवति। बहुधा भावप्रकटने अनुवादकर्ता मूलरचनाकारस्य अभिव्यक्तिकौशलस्य उपेक्षां कृत्वा आत्मभावेषु एव मुग्ध: जायते। यथा राजा राम:, राज्ञी सीता इति शब्दद्वयस्य उर्दूभाषायां भावानुवाद: अवलोकनीय:। तत्र राजा-राज्ञी इति शब्दद्वयस्य भावार्थ: बादशाह-बेगम इत्येव भवति। तादृशेन भावेन बादशाह राम , बेगम सीता इति कथनं कथम् अपि न शोभते। अत: एष: अनुवाद: अपि आदर्श: नास्ति।

**छायानुवाद:**

केचन विद्वांस: भावानुवादम् एव छायानुवादरूपेण स्वीकुर्वन्ति। यतो हि तेषां मते शब्दस्य छाया एव तस्य भाव: भवति। तेषां मतस्य अपि अभिप्राय: मूलार्थस्य प्रकटनेन एव अस्ति इत्यत: महान् विरोध: नास्ति। छायानुवादे तावत् मूलभाषाया: शब्दानां , भावनां सङ्कल्पनानां च सङ्कलित-प्रभाव: लक्ष्यभाषायां रूपान्तरित: भवति। अस्मिन् अनुवादक:

मूलभाषया बद्ध: भूत्वा तस्या: छायायां लक्ष्यभाषया विषयं वर्णयति। संस्कृतनाटकेषु छायानुवादस्य बहूनि उदाहरणानि प्राप्यन्ते। उदाहरणार्थम् अभिज्ञानशाकुन्तलम् इत्यादिनाटकेषु यानि पात्राणि प्राकृतभाषां वदन्ति। सा प्राकृतभाषा संस्कृतवाक्यस्य छायानुवादरूपेण एव भवति। यथा जगद्गुरुशङ्कराचार्यस्य चर्पटपञ्जरिकास्तोत्रस्य एकस्य पद्यस्य छायानुवाद: द्रष्टव्य: -

**भगवद्गीता किञ्चिदधीता, गङ्गाजललवकणिका पीता।**

**सकृदपि यस्य मुरारिसमर्चा, तस्य यम: किं कुरुते चर्चा।।**

**पढ़ी तनिक जो भगवत् गीता, गंगा जल की बूंद भी पीता।**

**प्रेम सहित हरि भजन जो करता, यम उसकी चर्चा से डरता।।**

**व्याख्यानुवाद:**

एष: अनुवाद: भाष्य-अनुवाद: , टीक-अनुवाद: इत्यादिशब्दै: अपि ज्ञायते। अस्मिन् अनुवादक: मूलभाषाया: विचाराणां , भावानां सङ्कल्पनानां च निजलेखनशैलीम् उपयुज्य लक्ष्यभाषायां सविस्तरं रूपान्तरणं करोति। अस्मिन् विषयं स्पष्टीकर्तुम् अतिरिक्त-उदाहरणानि अपि दातुं शक्यन्ते। यथा लोकमान्य-तिलकस्य गीतारहस्यम् इति ग्रन्थ: गीताया: व्याख्यानुवाद: एव मन्तव्य:।

**सारानुवाद:**

वृहद्-आकारक-रचनानां गद्ये पद्ये वा संक्षिप्त-अनुवाद: सारानुवाद: भवति। सुदीर्घभाषणानाम् अनुवादे सारानुवाद: अपि उपयुज्यते। अस्मिन् घटे समुद्रवत् विवरणस्य यत्न: क्रियते। अत: एतत् कार्यम् अतीव परिश्रमसाध्यम् अस्ति। अस्मिन् अनुवादक: संक्षिप्तता , सरलता, स्पष्टता इत्यादिगुणै: सह भाषाया: स्वाभाविकप्रवाहस्य अपि परिपालनं करोति। सप्तश्लोकगीता, सप्त-श्लोकी दुर्गापाठ:, चतुश्श्लोक-भागवतम् इत्यादीनि अस्य उदाहरणानि सन्ति।

**आशु-अनुवाद:**

सभासु द्विभाषाभाषी जन: आशु-अनुवादं करोति। एष: अनुवाद: त्वरित-रूपेण भवति , अत: अस्मिन् आशयस्य प्राधान्यं भवति। अत्र प्रायश: मूलभाषाया: लक्ष्यभाषाया: च वाक्यानि समानानि न भवन्ति। यथा वैदेशिक-राष्ट्राध्यक्षै: सह सम्भाषणे आशु-अनुवाद: एव क्रियते। आशु-अनुवादाय अनुवादकस्य भाषायां पूर्णाधिकार: आवश्यक: अस्ति। अनुवादस्य विश्वसनीयतायै अनुवादकस्य मुखमुद्राया: शारीरिकभाषाया: च अपि महत्त्वं भवति।

**रूपान्तरणानुवाद:**

अस्मिन् अनुवादे साहित्यस्य एकस्या: विधाया: रचनाया: रूपान्तरणम् अन्यस्यां विधायां क्रियते। रूपान्तरणानुवादं कर्तुं भाषाधिकारेण सह साहित्यिक-कुशलताया: अपि आवश्यकता

भवति। कथाया: नाटके , नाटकस्य कथायां वा रूपान्तरणं सारल्येन भवितुम् अर्हति। अनेके कवय: गद्यरचनाया: पद्यानुवादे कुशला: भवन्ति। एवमेव नाटकानां रेडियोनाटकरूपेण परिवर्तनम्, कथाया: कवितारूपेण , गद्यस्य पद्यरूपेण परिवर्तनं रूपान्तरणानुवादस्य एव उदाहरणम् अस्ति। यथा प्रेमनारायणद्विवेदी महोदय: कादम्बरी (गद्यम्) रामचरितमानसम् (अवधिभाषा) इत्यनयो: ग्रन्थयो: संस्कृत-भाषया पद्यानुवादं कृतवान्।

**आदर्शानुवाद:**

आदर्शानुवादस्य तथ्यानुवाद: , स्वाभाविकानुवाद:, सटीकानुवाद: इत्यादीनि नामान्तराणि अपि सन्ति। अत्र मूलभाषाया: लक्ष्यभाषाया: च आत्मनो: एकीभाव: जायते। आदर्शानुवादे एवं प्रतीयते यत् मूलभाषाया: लेखक: एव कदाचित् लक्ष्यभाषायाम् अपि समानाधिकारेण विषयम् उपस्थापयन् अस्ति इति। अस्मिन् अनुवादक: मूलभाषाशैलीं समाश्रित्य शब्दार्थयो: औचित्यपूर्णप्रयोगं कुर्वन् तथ्यानां यथावत् प्रस्तुतिं करोति। अनुवादकस्य कौशलस्य प्रतिभायाश्च अत्र पूर्ण-उपयोग: भवति। यथा भक्तिवेदान्तस्वामि-प्रभुपादस्य 'श्रीमद्भगवद्-गीता यथारूप ' इति ग्रन्थे गीताश्लोकानाम् आदर्शानुवाद: कृत: अस्ति। एवमेव होसकेरे नागप्पशास्त्री महोदय: महात्मगांधी-महोदयस्य The Story of My Experiments with Truth इत्यस्या: आत्मकथाया: सत्यशोधनम् इति शीर्षकेण आदर्शानुवादं कृतवान्।

**अनुवादे समस्या:**

सामान्यत: द्वितीयभाषायां जनानां मातृभाषावत् अधिकार: न भवति। यतो हि विश्वभाषासु प्रत्येकं भाषाया: पृष्ठभूमि: भिन्ना भवति। प्रत्येकं भाषाया: मौलिकविशेषता: अपि भिन्ना: भवन्ति। अत: कयो: अपि द्वयो: भाषयो: सटीक-अनुवाद: ( Exact translation) अतीव दुष्करकार्यम् अस्ति। उत्तमम् अनुवादं कर्तुम् अनुवादकस्य कृते द्वयो: भाषयो: अधिकारेण सह अनुवाद-समस्यानां परिज्ञानम् अपि आवश्यकम् अस्ति। अनुवादसमस्या: ज्ञात्वा एव अनुवादकर्ता अनुवादसमये तासां समस्यानां परिहारं कृत्वा उत्तमम् अनुवादं सम्पादयितुं शक्नोति। प्रमुख-अनुवादसमस्या: सन्ति, यथा -

**सामाजिक-सांस्कृतिकभेदस्य समस्या**

प्रत्येकं भाषाया: परम्परा: , संस्कृति:, समाज:, साहित्यम्, मान्यता:, इतिहास: इत्येतत् सर्वम् अपि विशिष्टं भवति। कयो: अपि द्वयो: भाषयो: सामाजिक-सांस्कृतिक-इतिहास: समान: असमान: वा कथम् अपि भवितुम् अर्हति। यथा जन्मान्तरस्य सम्बन्ध:/पुण्यम्/पापम्/ऋणम् इत्यादिशब्दानाम् आङ्ग्ल-भाषया अर्थज्ञापनं कठिनम् अस्ति। एवमेव आङ्ग्लभाषाया: Good morning, Good night, Good afternoon इत्येतादृशानां शब्दानां सुप्रभातम् , शुभरात्रि:, सुमध्याह्नम् इति शब्दा: मूलत: भारतीयसंस्कृतौ व्यवहारे न आसन् , किन्तु लोकव्यवहारदृष्ट्या कालान्तरे रचिता:। भारतीयसंस्कृतौ तु नमस्कार: , प्रणाम इत्येतादृशा: शब्दा: एव अभिवादनाय

परम्परया प्रयुज्यन्ते स्म। मङ्गलसूत्रम् , चूडामणि:, नूपुरे इत्यादीनि आभूषणानि भारतीयसंस्कृतौ एव सन्ति इत्यत: एतेषाम् आभूषणानाम् आङ्ग्लानुवाद: यथार्थत: भवितुं न अर्हति।

सांस्कृतिकभेदस्य अन्यानि अपि उदाहरणानि भवितुम् अर्हन्ति। यथा आङ्ग्लभाषाया: Great इत्यस्य शब्दस्य संस्कृते तावत् महान् इति अनुवाद: चिन्त्यते। किन्तु एष: अनुवाद: सार्वत्रिक: नास्ति। सांस्कृतिकभेदवशात् सर्वत्र Great इत्यस्य महान् इति अनुवाद: अनर्थाय भवेत्। यदि कश्चित् जन: उत्तमनिद्राया: अर्थे Great Sleep इत्यस्य अनुवादं 'महा-निद्रा' इति करोति, चेत् सा निद्रा मरणसूचनायै भविष्यति। यतो हि संस्कृते शंख: , तैलम्, मांसम्, वैद्य:, ज्योतिषी, ब्राह्मण:, यात्रा, पन्था, निद्रा एतेषां शब्दानाम् अग्रे महत्-शब्दस्य प्रयोगे अर्थ: नकारात्मकरूपेण परिवर्तते। यथोक्तम् -

**शङ्खे तैले तथा मांसे, वैद्ये ज्योतिषिके द्विजे।**
**यात्रायां पथि निद्रायां महच्छब्दो न दीयते॥**

**लोकोक्तीनाम् अनुवादसमस्या**

लोकोक्तीनाम् अनुवादे अपि एषा एव समस्या अस्ति। अत: उत्तम: अनुवादकर्ता भाषान्तरे या: लोकोक्तय: सन्ति , तासां समुपयोगं करोति। अन्यथा अर्थस्य अनर्थ: भवेत्। यदि समान-अर्थे लोकोक्ति: भाषान्तरे प्राप्यते , तर्हि तस्या: एव प्रयोग: शोभते। यथा उदाहरणद्वयम् अवलोकनीयम् -

संस्कृतलोकोक्ति: - जलबिन्दुनिपातेन क्रमश: पूर्यते घट:।
हिन्दीलोकोक्ति: - बूँद बूँद से घडा भरता है।
आङ्ग्ललोकोक्ति: - Many a little makes a mickle.

एवमेव अन्यत् उदाहरणं द्रष्टव्यम् -

संस्कृतलोकोक्ति: - सर्वनाशे समुत्पन्ने अद्र्धं त्यजति पण्डित:।
हिन्दीलोकोक्ति: - कुछ नहीं से कुछ भला/भागते चोर की लंगोटी सही।
आङ्ग्ललोकोक्ति: - Something is better than nothing.

अत्र तिसृषु अपि भाषासु समानार्थक-लोकोक्ति: नास्ति इत्यत: साधारण-अर्थे एव अनुवाद: उचित:। यदि It's raining cats and dogs इत्यस्य मार्जारा: शुनका: च वर्षन्ति इति अनुवाद: क्रियेत, तर्हि तत् अनर्थाय एव स्यात्। एवमेव Apple of one's eye इत्यस्य कस्यचित् नेत्रस्य सेवफलम् इति अनुवाद: अपि अनर्थाय एव अस्ति।

**पारिभाषिकशब्दानाम् अनुवादसमस्या**

एवमेव शास्त्रीयविषयाणां पारिभाषिकशब्दानां ज्ञानेन विना तेषाम् अनुवाद: भवितुं न अर्हति। यथा व्याकरणे गुण: , वृद्धि:, नदी, व्यापार: इत्यादीनां शब्दानां लौकिक-अर्थवत् अर्थ:

नास्ति। उदाहरणार्थं लोके गुणशब्देन तावत् स्वभाव: , विशेषता, रज्जु: इत्यादय: अर्था: स्वीक्रियन्ते। एवमेव मीमांसायां भावना , उपाधि: इत्यादीनां शब्दानाम् अर्थ: लौकिकार्थात् भिन्न: अस्ति। अत: शास्त्रविशेषस्य गभीराध्ययनं कृत्वैव पारिभाषिकशब्दानाम् अनुवाद: करणीय:।

**संस्कृतस्य भारतीयभाषाभि: अनुवादसमस्या**

विश्वभाषासु संस्कृतशब्दा: प्राप्यन्ते। विशेषत: भारतीयभाषासु 70 प्रतिशतं शब्दा: संस्कृतनिष्ठा: एव सन्ति। किन्तु एतेषां शब्दानाम् उत्तरभारतीय-भाषासु य: अर्थ: अस्ति , स एव दक्षिणभारतीयभाषासु अपि स्यात् इति आवश्यकं नास्ति। संस्कृतस्य शब्दा: प्रान्तीयभाषासु अन्येषु अर्थेषु रूढा: सञ्जाता: यथा अनर्गल-शब्द: संस्कृते अनियन्त्रित-अर्थे अस्ति किन्तु तेलुगुभाषायां निरन्तर-अर्थे प्रयुज्यते। कल्याण-शब्द: संस्कृते स्वस्ति-अर्थे अस्ति किन्तु द्राविडभाषासु विवाह-अर्थे। तथैव मलयालमभाषायां धृति: इत्यस्य त्वरा ; सम्भावना इत्यस्य दानम्; चरित्रम् इत्यस्य इतिहास: इत्यादिरूपेण अर्थभेदा: सन्ति। एवमेव अन्नम् इति शब्देन उत्तरभारते गोधूम:, दक्षिणभारते च ओदनम् इति अर्थ: स्वीक्रियते। अत: संस्कृतभाषा-सम्बद्धम् अनुवादं कर्तुं क्षेत्र-भाषाणाम् अपि शब्दार्थविषये अनुवादकेन जागरूकेण भाव्यम् इति।

संस्कृत-अनुवादे विशेषसमस्या:

प्रत्येकं भाषाया: आत्मन: नैजं सौन्दर्यं भवति। संस्कृतस्य शब्दभण्डार: तु महान् भवति , तत्र ये चमत्कारा: भवन्ति , तेषाम् अनुवाद: भाषान्तरे भवितुं न अर्हति। उदाहरणार्थम् अभिज्ञानशाकुन्तलस्य अधोलिखितवाक्यं पठनीयम् -

**तापसी - सर्वदमन ! शकुन्तलावण्यं पश्य।**

**बाल: - (सदृष्टिक्षेपम्) कुत्र वा मम माता।**[iii]

अत्र बालक: सर्वदमन: शकुन्त-लावण्यं पश्य (शकुन्त-पक्षिण: सौन्दर्यं पश्यतु) इति वाक्ये शकुन्तला इति पदं श्रुत्वा स्वमातु: शकुन्तलाया: विषये पृच्छति यत् मम माता कुत्र अस्ति ? इति। अस्य अनुवाद: कया अपि भाषया सहजतया भवितुं न अर्हति। एवमेव कं बलवन्तं न बाधते शीतम्? इति प्रश्नवाक्यस्य अनेन एव वाक्येन उत्तरम् कम्बलवन्तं न बाधते शीतम् इति एतादृश: प्रश्नोत्तर-चमत्कार: अनुवादे भाषान्तरे वा भवितुं न अर्हति।

शब्दानां दर्शनेन सह घनिष्ठसम्बन्ध: भवति। धर्म: , कर्म, गुरु:, योग:, ब्रह्मन्, आत्मन्, समाधि:, यज्ञ:, मन्त्र:, इत्येतादृशानां शब्दानां काचित् दार्शनिक-पृष्ठभूमि: अपि अस्ति। एतेषां शब्दानाम् आङ्ग्लादि-वैदेशिकभाषासु अनुवादे यथा Religion, Action, Teacher, Exercise, God, Soul, Mausoleum इत्यादि-शब्दै: प्राथमिकरूपेण स्थूल-अर्थ: एव ज्ञायते। किन्तु

एतादृशानां शब्दानां दार्शनिक-अर्थस्य प्राप्तिं कर्तुम् आङ्ग्ले समानार्थक-शब्दा: नैव सन्ति इति कारणत: उच्चस्तरीय-आङ्ग्लविद्वांस: एतेषाम् एव शब्दानाम् आङ्ग्ले अपि यथावत् प्रयोगं कुर्वन्ति।

**अनुवादगत-समस्यानां कारणानि-**

अनुवादे महती समस्या अनेकार्थशब्दानाम् अर्थनिश्चयस्य भवति। अर्थ: क: ? इति प्रश्नस्य उत्तरं वाक्यपदीयकार: लिखति -

**यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थ: प्रतीयते।**
**तमाहुरर्थस्तस्यैव नान्यदर्थस्य लक्षणम्।।**[iii]

अर्थात् शब्दस्य उच्चारणेन य: आशय: प्रतीत: भवति , स: आशय: एव तस्य अर्थ: भवति , अर्थस्य अन्यत् किम् अपि लक्षणं नास्ति इति। किन्तु यदा शब्दस्य अनेके अर्था: भवन्ति , तदा क: अर्थ: ग्राह्य: इति समस्या उदेति। अस्या: समस्याया: समाधानम् अपि वाक्यपदीये कथितम् , तद्यथा -

**बहुष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु।**
**यत्प्रयोक्ताऽसन्धत्ते शब्दस्तत्रावतिष्ठते।।**[iv]

अर्थात् अनेकार्थकशब्दानां समानार्थकशब्दानां च क: अभीष्ट: अर्थ: इत्यस्य निर्णय: शब्दप्रयोक्तु: प्रयोग-भावनया एव करणीय:। प्रसङ्गानुसारं वक्ता यम् अर्थं प्रकटीकर्तुम् इच्छति , स: एव अनेकार्थकशब्दानां समानार्थशब्दानां च वाच्य-अर्थ: मन्तव्य: इति।

भाषा प्रवाहशीला भवति। प्रवाहे परिवर्तनं स्वाभाविकम् एव भवति। शब्दानाम् अर्थेषु अपि परिवर्तनं भवति। देशकालभेद: , व्यङ्ग्यप्रयोग:, लाक्षणिकप्रयोग:, अप्रसिद्धता, सांस्कृतिकपरिवर्तनम्, अज्ञानता, अलङ्कार-अतिरेक: इत्यादि-बहुभि: कारणै: शब्दानाम् अर्थपरिवर्तनं भवति। यथा मन्दिरम् , मृग: इत्यादिशब्दानां प्रयोग: व्यापक: आसीत् , किन्तु इदानीं सीमित-अर्थे एव एतेषां प्रयोग: भवति। अत: अर्थपरिवर्तनं न ज्ञायते चेत् शुद्ध-अनुवादस्य विधानं भवितुं न अर्हति।

**भाषायाम् आधुनिकशब्दा:**

एतत् अतिरिच्य अद्यत्वे वैज्ञानिकप्रगति-कारणत: नित्यम् एव तत्र तत्र भाषासु नवीनशब्दानाम् अपि आविष्करणं जायमानम् अस्ति। यथा हि- टचस्क्रीन , गैजेट, मीडिया, ऑनलाइन, डिजीटलाइजेशन इत्यादीनां शब्दानाम् अनुवादे महान् विमर्श: आवश्यक:। अपि च सामाजिक-आर्थिक-परिवर्तनानां कारणत: अपि शब्दानां निर्माणं जायमानम् अस्ति येषाम् मानक: अनुवाद: सरल: नास्ति। एतासां समस्यानां समाधानाय भारतशासनेन वैज्ञानिक एवं तकनीकी शब्दावली आयोग: स्थापित: । अनेन आयोगेन सहस्रश: विदुषां सहयोगं स्वीकृत्य

प्रशासनम्, विज्ञानम्, मानविकी, वाणिज्यम्, सांख्यिकी, शिक्षा, रक्षा, कृषि:, अभियान्त्रिकी, चिकित्सा इति विंशति-क्षेत्रेषु पञ्च लक्षाधिकशब्दानां हिन्दीभाषया मानकानुवादकार्यं कृतम्। संविधानस्य अनुच्छेद: 351 इत्यस्य अनुपालनायाम् अस्मिन् अनुवादकर्मणि मुख्यतया संस्कृतभाषाया: सहयोग: स्वीकृत: अस्ति। संस्कृते यदि सरलमानकसंस्कृतम् उपयुज्य अनुवादकार्यं क्रियते चेत् ये जना: संस्कृतं न जानन्ति , ते अपि संस्कृतं पठित्वा अर्थावगमनं कर्तुं शक्नुवन्ति। मातृभाषायां ये संस्कृतनिष्ठा: शब्दा: प्रसिद्धा: सन्ति , तेषाम् अधिकाधिक-उपयोगेन अनुवाद: करणीय:। येन जना: संस्कृतभाषाया: सारल्यं जानीयु:।

**अनुवादशिक्षणविधय:**

संस्कृत-अनुवादशिक्षणस्य कृते त्रय: प्रमुख-विधय: सन्ति, तद्यथा -

**पुस्तकविधि:**

संस्कृतभाषायां कौशलं प्राप्तुम् एष: विधि: अतीव प्रचलित: अस्ति। अस्मिन् विधौ पुस्तके मासात्मक: द्विमासात्मक: वा पाठ्यक्रम: प्रदीयते। प्रतिदिनम् एकं पाठं पठित्वा निर्धारितसमये अनुवादकौशलस्य लक्ष्यं प्राप्तुं शक्यते। संस्कृतेन अनुवादाय बृहद् अनुवादचन्द्रिका , रचनानुवादकौमुदी, अनुवादरत्नाकर:, संस्कृत-स्वयं-शिक्षक:, संस्कृतशिक्षणसरणी इत्यादीनि अनेकानि पुस्तकानि रचितानि सन्ति। एतेषु पुस्तकेषु 'सरलात् कठिनं प्रति' इति शिक्षणसूत्रस्य आधारे परस्परं सम्बद्धा: अनेके पाठा: भवन्ति। पूर्वदिनस्य पाठम् अपठित्वा अग्रिमस्य दिनस्य पाठस्य अवगमनं दुस्साध्यं भवति। अत: सर्वे अपि पाठा: क्रमेण पठनीया: भवन्ति।

**द्विभाषाविधि:**

एष: विधि: राष्ट्रिय-संसदि , संयुक्तराष्ट्रसंघ:, अन्ताराष्ट्रिय-नेतृसम्मेलनम् इत्यादिषु औपचारिक-सम्मेलनेषु प्रचलित: अस्ति। अद्यत्वे एतदर्थं यान्त्रिक-सौविध्यम् अपि उपलब्धम् अस्ति। यत्र यान्त्रिकसौविध्यं न भवति , तत्र द्विभाषाविधिना कश्चन जन: त्वरितरूपेण अनुवादं करोति। अस्मिन् एक: पक्ष: स्वमातृभाषया वदति। तत् श्रुत्वा द्विभाषाभाषी जन: द्वितीयभाषया अनुवादं कृत्वा द्वितीयपक्षं विषयं बोधयति। पुन: द्वितीयपक्षस्य वार्तां श्रुत्वा प्रथमपक्षं तस्य मातृभाषया बोधयति। एवं हि द्विभाषाभाषी जन: द्वयो: पक्षयो: मध्ये भाषासेतु-रूपेण कार्यं करोति। एतेन विधिना उभयो: पक्षयो: समयस्य महत् संरक्षणं भवति।

**अनुकरण-तुलना-विधि:**

अस्मिन् विधौ प्रथमत: शिक्षक: एकस्य अनुच्छेदस्य आदर्श-अनुवादं करोति। तत्पश्चात् स: छात्राणां पुरत: आदर्श-अनुवादं प्रस्तौति। छात्रा: तम् आदर्श-अनुवादं सम्यक्तया पठन्ति। पुन: शिक्षक: छात्राणां कृते मातृभाषया रचितं मूल-अनुच्छेदम् अथवा तादृशम् एव अन्यम् अनुच्छेदं दत्त्वा अनुवादाय तान् निर्दिशति। छात्रा: आदर्श-अनुवादस्य शैल्या: अनुकरणं कृत्वा स्वक्षमतया

अनुवादं कुर्वन्ति। पुन: छात्रा: आत्मकृतस्य अनुवादस्य तुलनाम् आदर्श-अनुवादेन सह कुर्वन्ति। शिक्षक: छात्रकृतस्य अनुवादस्य संशोधने साहाय्यम् आचरति।

**सहायकग्रन्था:**


1. द्विवेदी, कपिलदेव (1978); प्रौढरचनानुवादकौमुदी, विश्वविद्यालयप्रकाशन, वाराणसी।
2. नौटियाल, चक्रधर (1962); बृहद् अनुवादचन्द्रिका, मोतीलालबनारसीदास, दिल्ली।
3. पाण्डेय, रामशकल (2010); संस्कृत शिक्षण, श्रीविनोद पुस्तक मन्दिर, आगरा।
4. चौबे, विजयनारायण (1985); संस्कृतशिक्षणविधि, उत्तरप्रदेशहिन्दीसंस्थान, लखनऊ।
5. शास्त्री, वासुदेव (1998); क्रियात्मकसंस्कृतशिक्षण, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली।
6. सिंह, कर्ण (2002); संस्कृत शिक्षण विधि, एच.पी.भार्गव बुक हाउस, आगरा।
7. मिश्र, सन्तकुमार (2013); संस्कृत-शिक्षण, आर.लाल.बुक डिपो, मेरठ।
8. शास्त्री,धर्मेन्द्रनाथ (1968); संस्कृतशिक्षण की नवीनयोजना, साहित्यभण्डार, मेरठ।
9. अय्यर, विश्वनाथ एन.ई. (2009); अनुवाद कला, प्रभात प्रकाशन, नई दिल्ली।
10. Bolt, R. (2012); The Art of Translation, Oberon Books, London.


**सन्दर्भा:**

---

[i] ऋग्वेद:, 2/13/3

[ii] अष्टाध्यायी, 2/4/3

[iii] अनुवादे चरणानाम् इति सूत्रभाष्यस्य प्रदीपटीका

[iv] वाक्यपदीयम्, 2/1/15

[v] चर्पटपञ्जरिकास्तोत्रम्, 5

[vi] भट्टिप्रथमसर्गीयटीकायां भरत:

[vii] अभिज्ञानशाकुन्तलम्, सप्तम: अङ्क:, विंशते: श्लोकस्य प्रसङ्गे

[viii] वाक्यपदीयम्, 2/330

[ix] वाक्यपदीयम्, 2/406